In Public domain. Digitization Muthulakshmi Research Academy

Philosophical Essays – Prof. Anantalal Thakur Felicitation Vol.
Sanskrit Pustak Bhandar, Calcutta, 1987.

45

5

"क्रमसरूपविवेचनम्" (कालीदर्शनम्)

डा० उमारमण झा, डि. लिट्
दर्शन-विभागाध्यक्ष, श्रीरणवीर केन्द्रीय संस्कृत
विद्यापीठ, शास्त्रीनगर, जम्मू (तवी)-4

अभिनवगुप्ताचार्येण तंत्रालोके क्रमदर्शनस्य विचारः कृतः। अस्य दर्शनस्य नामानि क्रमदर्शनम्, कालनयः, देवीनयः, औत्तरामनायश्च इति सन्ति। अस्य दर्शनस्य क्रमदर्शनमिति प्रमुख नाम वर्तते यतो हि अस्य दर्शनानुसारं निर्विकल्पक रुपस्य परतत्वस्य ज्ञानरूपमोक्षोपायः विकल्पसंस्कारो वर्तते। अयं संस्कारः क्रमशः उत्पद्यते सहसा च न जायते। अतः अस्य क्रमसंज्ञा वर्तते।

क्रमदर्शनानुसारं परमतत्वं काली वर्तते। अस्या एव उपासना विशेषरूपेण अस्मिन् दर्शने क्रियते। कालीदेवी क्षेप-ज्ञान-प्रसंख्यान-गति-नादनाम्नां पंचकृत्यानां सम्पादनं करोति। इयं काली शिवस्य देवी वर्तते। अतः अस्य दर्शनस्य नामान्तरं देवीनयः वर्तते। पंचवक्त्र शिवस्य उत्तरमुखादुत्पन्नत्वात् औत्तराम्नाय इति अस्य नामान्तरम्। उत्तरस्य दक्षिणेण विरोधत्वात् अस्य वाममार्गोऽपि नामान्तरम्। जयरथमतानुसारं काश्मीरं उत्तरपीठनाम्ना तन्त्रेषु अभिहितम्। अतः अत्र काश्मीरे उद्भवत्वात् औत्तराम्नाय इति संज्ञा समजनि।

तन्त्रालोकस्य चतुर्थे आह्निके अभिनवगुप्तः कुलदर्शनस्य त्रिकदर्शनस्य च समानमेव क्रमदर्शनस्य विवेचनमकरोत्। क्रमदर्शनस्य विषये जयरथेनापि टीकायां विस्तरेण विवेचनमकारि। क्रमस्तोत्रग्रन्थोऽपि समुपलभ्यते। क्रमकेलिनाम्ना प्रसिद्ध टीकाग्रन्थोऽपि केनापि अज्ञातनाम्ना विदुषा व्यधायि। क्रमस्तोत्रे अभिनवगुप्तेन अनाख्यचक्रे उपास्यद्वादश देवीनां वर्णनमकारि। महार्थमन्जर्याः सन्दर्भेण ज्ञायते यद् अभिनवस्य पट्टशिष्येण क्षेमराजेन अस्य क्रमस्तोत्रस्योपरि टीका विलिखिता। चोलदेशीयस्य तान्त्रिकस्य गोरक्षस्य (महेश्वरानन्दाख्यस्य च) महार्थमञ्जरी परिमल व्याख्यया प्रौढ़ग्रन्थः अस्य शास्त्रस्य वर्तते। एतदतरिक्ताः क्रमसद्भाव-क्रमसिद्धि-ब्रह्मयामलादि

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थाः अस्य शास्त्रस्य आसन्[1]। शिवानन्दनाथः, ह्रस्वनाथः सोमराजः अन्येऽपि केचिदाचार्याः अस्मिन् तन्त्रे अभवन। क्रमसूत्र-पञ्चशतिक-महानय प्रकाशादीनां ग्रन्थानामपि उल्लेखः अस्य शास्त्रस्य सन्दर्भे दृश्यते।

क्रमदर्शनस्य सिद्धान्तः पञ्चकाश्रितः वर्तते। परमेश्वरः पञ्चरुपेषु स्फुरितो भवति। स्फुरणस्य आधारः पञ्चवाहनाम्ना प्रख्यातोऽस्ति यत्र व्योमवामेश्वरी, खेचरी, दिक्चरी, गोचरी, भूचरी च सम्मिलिताः सन्ति। परमेश्वरस्य कार्यशक्तयः पञ्चधाः सन्ति—

सृष्टि-स्थिति-संहार-अनख्य-(अवर्णनीय)-भास (स्वातन्त्र्य) भेदात्। क्रमदर्शनानुसारं वाक्प्रकारोऽपि परा-सूक्ष्मा-पश्यन्ती-मध्यमा-वैखरी-भेदेन पञ्चधा भवति। एवमेव ध्यानार्थं पञ्चकम्—

श्रीपीठ-पञ्चवाह-नेत्रत्रय-वृन्दचक्र-गुरुपंक्ति इति पञ्चरूपं भवति। परमेश्वरस्य शक्तयोऽपि पञ्चधाः भवन्ति—चित्-आनन्द-इच्छा-क्रिया-ज्ञान भेदात्। अस्मिन् दर्शने विभिन्नानां पञ्चकानां कल्पना कृताऽस्ति यतोऽहि मूलतत्त्वं काली पञ्चकृत्यानि करोति। क्षेप-ज्ञान-प्रसंख्यान-गति-नाद भेदेन काल्याः पञ्चकृत्यानि भवन्ति।

क्रमदर्शने परतत्त्वं काली नाम्ना उच्यते। अतः इदं कालीदर्शनमित्यपि उच्यते।

काली शब्दस्य व्युत्पत्तिः कल् धातोः अकर्तारे च कारके संज्ञायाम् (3-3-19) इति पाणिनिसूत्रेण घञ प्रत्यये स्त्रीत्व विवक्षायां ङीप् प्रत्ययाविधानेन काली इति सिध्यति। कलयति कामधेनुः।

कल विक्षेपे, कल् गतो, कल संख्याने, कल् शब्दे एवं—गत्यर्थक कल् द्वयर्थकत्वात्।

कलयति—स्वात्मा भेदेन स्थितं प्रमातृ प्रमाण प्रमेयरूपं विश्वं-बहिर्भावेन उल्लासयतीति परा संविद्देवी काली इत्युच्यते। अतः परसंविद् देवी काली इति वक्तुं शक्यते।

—श्रीक्रमनयप्रदीपिका, लक्ष्मण जू०, पृ=3

कलयति स्वात्मबहि र्भावेनावभासितमपोदं मातृमानमेयात्मकं जगत् स्वात्माभेदेनैव परामृश्यतीति परैव संविद् देवी काली इत्युच्यते। —श्रीक्रम०, पृ०=3

---

[1] के० सी० पाण्डेय, अभिनवगुप्त, द्वि० सं० चौखम्बा (काशी, 1963)
पृ०=467-4-81।

In Public domain. Digitization Muthulakshmi Research Academy

एवं कलयति–भेदितमपि मातृमेयादिकं जगद्रूपमर्थं परस्परापोहनात् अयं घटः, न पटः इति प्रतिनियतरूपतया अवस्थापयति—इति परैव चिल्लहरी संवित्-काली इत्युच्यते।

कलयति–यया मातृमानमेयात्मको भेदितोऽर्थः स्वसंवित्तिमकुरे स्वात्मन्यतिरिक्तस्वेऽपि अन्यतिरेकेण स्वरूपा रोहितत्वेनैवावस्थापयतीति परा कालसंकर्षिणी देवी काली इत्युच्यते।

कलयति—समस्तानामविकल्पसविकल्पादीनां ज्ञानानां सृष्टि-स्थिति-संहारपिधानानुग्रहात्मक पंचकृत्यत्वानुसन्धानेन स्वात्मपरामर्शशेषतयैव सर्वं परामृश्यतीति परैव संवित् काली इत्युव्यते।

कालि पंचस्वरुपात्मिका भवति—

1. कालीतत्त्वं स्वान्तः विद्यमानान् पदार्थान् बहिः प्रक्षेपयति अतः स्वात्मनो भेदनं क्षेपः इति कालपाः प्रथमं कार्यम्।
2. बहिः उल्लासितपदार्थानां स्वाभेदरूपेण ग्रहणं काली तत्त्वम्। भेदस्य अविकल्पनम् ज्ञानं विकल्पः इति।
3. कालो तत्त्वं अभिव्यक्तपदार्थानां परस्परं पृथक् कर्तुं प्रभवति। अयं पदार्थः इत्थमस्ति अन्यथा नास्तीति कृत्वा कालीतत्त्वं सिध्यति।
4. कालीतत्त्वं प्रतिबिम्बवत् पदार्थान् स्वरूपेण आभासयति। गतिः स्वरूपारोहितत्वं प्रतिबम्बवदेव यत् इति।
5. कालोतत्त्वं अभिव्यक्तान् पदार्थान् स्वीये लीनं करोति एवं मूलस्वरूपम् आत्मचैतन्यरूपं स्फुरति।

नादः—स्वात्मपरामर्शशेषतातद्विलोपनात्[2]। एवं पंचधा कालीतत्त्वं समर्थं भवति[3] काली विश्वस्य मूलतत्त्वं वर्तते। काली त्रिभिः नामभिः अभिधीयते-मातृसद्भावेन[4], व्योमवामेश्वरीरूपेण कालकर्षिणीरूपेण च।

---

[2] तन्त्रा० आ०, 3.204—275.

[3] इतिपञ्चविधामेनां कलनां कुर्वती परा।
देवी काली तथा कालकर्षिणी चेति कथ्यते॥

[4] मातृसद्भावसंज्ञास्यास्तेनोक्ता य प्रमातृषु।
एतावदनन्तसंवित्तौ प्रमातृत्वं स्फुटी भवेत्॥ —तन्त्रा० 4.177

In Public domain. Digitization Muthulakshmi Research Academy

कालीदेव्याः सत्ताश्रयेण समस्तस्य भाववर्णात्मकस्य जगतः प्रमातृता (ज्ञाप्तिभानं) स्फुटो भवति । अतः इयं मातृ सद्भावनाम्ना उच्यते ।

इयं वामेश्वरी नाम्नापि कीर्त्यते । यतो हि सर्वं संहारणात्मकं रौद्ररूपं भयंकर क्रमं त्यक्त्वा सर्वाह्लादप्रदं क्रमं गृह्णाति एवं त्रिपुरसुन्दरीरूपेण प्रकाशिता भवति ।

काली स्वातन्त्र्यशक्तिरूपाऽस्ति या क्रमशः द्वादश रूपेण प्रकटी भवति । जीवः काल्याः क्रमशः द्वादशस्वरूपान् ज्ञात्वा मुक्तो भवति । अतः सा मातृसद्भावरूपाऽस्ति । काली कालादपि अवच्छिन्नास्ति । अतः सा कालकर्षिणी इत्युच्यते । यथा रोगी वमनद्वारा दूषितपदार्थान् बहिः करोति तथैव काली स्वेच्छया अनुभवरूपान् समस्त-पदार्थान् बहिः करोति ।

क्रमशास्त्रानुसारं काली द्वादशविधा वर्तते—

1. सृष्टिकाली, 2. रक्तकाली, 3. स्थितिनाशकाली, 4. यमकाली, 5. संहारकाली, 6. मृत्युकाली, 7. रूद्रकाली (भद्रकाली), 8. मार्तण्डकाली, 9. परमार्ककाली, 10. कालानलरूद्रकाली, 11. महाकालकाली, 12. महाभैरवचण्डीग्रघोरकाली ।

कालीतत्त्वस्य साक्षात्काराय क्रमदर्शने राजयोगस्य मन्त्रानुष्ठानस्य च विधानमस्ति । अभिनवगुप्ताचार्यस्य मतेन महेश्वरानन्दस्य मतेन च काल्याः साक्षात्काराय पूजाविधान-मावश्यकमस्ति किन्तु पुष्प-नैवेद्यादि बाह्योपचारैस्तत्र पूजायाः विधानं न युक्तमिति प्रतिपादितम् । तस्मात् स्वस्वरूपपरामर्श एव परमा पूजा । अभिनवगुप्तस्य मतेन संविदेकात्म्येन अवस्थानं पूजा । तन्त्रर०, 3-211 महाकाल्याः परतत्त्यस्य स्वरूपविषये अभिनवगुप्तेनोक्तम्—

प्रकाशाख्या संवित् क्रमविरहिता शून्यपदतो, बहिर्लोनात्यन्तं प्रसरति समाच्छाद-कतया ततोऽप्यन्तः सारे गलितरभसादक्रमतया, महाकाली सेयं मम कलयतां काममखिलम् ।।

—क्रमस्तोत्र, श्लो० 26.

क्रमशास्त्रमेव कालिकाशास्त्रं कथमिति जिज्ञासायाम् उत्पलाचार्योऽलिखत्कालः सूर्यादिसंचार—

स्तत्तत्पुष्यादि जन्म वा ।
शीतोष्णे वाथ तल्लक्ष्यः
क्रम एव स तत्त्वतः ।।

In Public domain. Digitization Muthulakshmi Research Academy

अर्थात् काल एव क्रमोऽस्ति। संकर्षिण्याः द्वे अवस्थे स्तः। एका स्वरूप संकोचावः अनाख्यरूपा वर्तते। इमामवस्थां प्राप्य द्वैतभानं न तिष्ठति। अतः इयं विश्वोत्ती अवस्था वर्तते। अस्याः द्वितीया अवस्था स्वरूप विकासात्मिका भवति। इयं विश्वम अवस्था वर्तते। वस्तुतः भक्तानां कृते विकासावस्था सुलभा भवति—

संकोचमिच्छसि यदा गिरिजे तदानीं
वाक् तर्कयोस्त्वमसि भूमिरनामरूपा।
यद्वा विकासमुपयासि यदातदानीं
त्वन्नामरूपगणनाः सुकरी भवन्तिः॥
—पंचस्तवो।

अस्याः काल्याः द्वादशैव नामानि कथमत्र गृहीतानि इति विषये उच्यते जगद्रू वस्तुनः चतुर्धा विभज्यते-प्रमिति वर्ग-प्रमातृवर्ग-प्रमाणवर्ग-प्रमेयवर्ग भेदात्।

1. "ग्राह्यग्राहकभावातीतः" ज्ञातोऽयं मयार्थः प्रमातृवर्ग एव प्रमितिवर्गः। इयमव जगद्रूपतायाः प्रथामाङ्कुरूपेण भवति।

अस्य प्रसरणात्मकवेगात् जगतः उत्पत्तिः संभाव्यते। अस्यामवस्थायां प्र पूर्णतः प्रमायामेव विलोनस्तिष्ठति। अयं प्रमितिवर्गः चतुर्दलचक्रनाम्ना संकी यतो हि अत्र देवीत्रयं (परा, परापरा, अपरा) एवं मातृसद्भाव रूपेण चत्वारि च सन्ति। अस्यां दशायां शिवरूपः परप्रमाता अपि शक्तिरूपेणैव तिष्ठति। अस्यां शिवात्मकं विकासं न प्रापनीति अत चतुर्दलचक्रात्मकोऽयं प्रमिति वर्गः अनाख्यारू उच्यते।

2. यदा प्रमातृवर्गः जगद्रपूताया स्थालत्वे, प्रसरति तदा स्वोदमस्थलरूपेण प्रभि सह प्रसरति। अस्मिन् प्रमातृवर्गे समस्त प्रमातृसमूहः जागतिकान् भं भुंक्ते। एते भोगाः शब्दस्स्पर्श रूपरस गन्धरूपाः भवन्ति। अयं प्रमा अरि नस्वरूपो भवति। तथा चोक्तम्—"योऽयं वह्नेः परं तत्वं प्रमातुः तत्' अर्थात् अरि नखरूपवेत् प्रमातुः स्वरूपं मन्यते। यथा अग्नौ अष्टौ भवन्ति तथा अत्रापि अष्टौ कलाः भवन्ति।

प्रमितिवर्गात् प्रसृतं देवीत्रयं प्रमातृ-सद्भावस्वरूपं च अस्मिन् प्रमातृवर्गे कु रूपेण देवीत्रयरूपेण च परिणतं भवति। एवं च प्रमातृवर्गस्य भैरवेत्रयं कुले अत्रैवं संकलस्य गृह्यते। अतः अत्र अष्टौ कलाः भवन्ति—

In Public domain. Digitization Muthulakshmi Research Academy

1. परा, 2. परापरा 3. अपरा, 4. कुलेश्वरी (मातृसद्भावः), 5. भैरवत्रयपरः, 6. परापरः, 7. अपरः, 8. कुलेश्वरः।

अतः प्रमातृवर्गः अष्टारचक्रनाम्ना अपि व्यवह्रियते।

3. प्रमाणवर्गं भवन्ति। प्रमाणवर्गः सूर्यात्मको भवति। "सूर्यः प्रमाणमित्याहुः।" यथा सूर्यस्य द्वादशकलाः भवन्ति तथैव अत्रापि भवन्ति। प्रमाणवर्गस्यं स्थितिचक्र-प्रमृतिवर्गस्य च कलानां संमिश्रणं भवति।

अतः देवीत्रयं मातृसद्भावः (अफ़ाख्यचक्रस्य) प्रमितिवर्गस्य, भैरवत्रयं कुलेश्वरः (संहारचक्रस्य) प्रमातृवर्गस्य, प्रमाणवर्गस्य व्यक्ताव्यक्तरूपं देवीत्रयं मातृसद्भावश्च भवति। अतः अस्य नाम द्वादशारचक्रं वर्तते।

4. प्रमेयवर्गें शब्दस्पर्शादीनां विषयाणामुपलब्धिः भवति। प्रमेयवर्गः सीमरूपं। भवति। सीमं मेयं प्रचक्षते।

यथा सोमस्य षोडशकलाः भवन्ति तथा अत्रापि षोडशकलाः भवन्ति। प्रमिति-प्रमातृ-प्रमाणवर्गाणां द्वादश कलाः, प्रमेयवर्गस्य सृष्टिचक्रस्य देवीत्रयं मातृसद्भावश्चेति चतस्रः कलाः इति षोडश कला भवन्ति।

प्रमितिवर्गः चतुर्दलात्मकः, प्रमातृवर्गः अष्टदलात्मक, प्रमाणवर्गः द्वादशदलात्मक प्रमेयवर्गः षोडशदलात्मकः इति काश्मीरशैवानां मतमस्ति।

प्रमाणगतचक्रे एव प्रमातृगतचक्राणां प्रमेयगतचक्राणां च अन्तर्भावः शास्त्रकारैः कृतः।

वस्तुतः परसंविद्रूपप्रमाता अग्निस्वरूपं वर्तते। अहं प्रकाशात्मा प्रमाता एव स्वातन्त्र्यशक्त्या द्वादशेन्द्रियस्वरूपेण प्रमांणदशां प्राप्नोति एवं च द्वादशकलासम्पन्नः सूर्य उच्यते। अतः प्रमाणदशा प्रमातुरेव बाह्यरूपेण भवति। अतः प्रमाणदशायां प्रमेयाणामन्तर्भावो भवति। अतः प्रमाणदशा द्वादशस्वरूपाणि द्वादशकालीरूपेण सादरं स्तुतियोग्यानि भवन्ति।

शैवयोगिनः प्रमाणसम्बन्धिमायात्मिकायां वेद्यवेदकसंक्षोभदशायां परप्रमातृ-भावात्मिकां स्वरूपप्रथनदशां स्वयमेव प्राप्नुवन्तीति अभिप्रायेण संसारचक्रस्य पूर्णविभव-स्थानस्वरूपसंसारदशायां द्वादशकालीनं स्वरूपप्रदर्शनं क्रमस्तोत्रादिग्रन्थे कृतमस्ति।

आचार्य उत्पलो लिखति—

नाथे वेद्यक्षये केन
न दृश्योऽस्येकक: स्थितः।
वेद्यवेदकसंक्षोभे—
प्यसि भक्तैः सुदर्शनः॥—उत्तरस्तोत्र०, 1—8.

In Public domain. Digitization Muthulakshmi Research Academy

अर्थात् हे स्वामिन्! घटपटादिवेद्यानां योगद्वारा नाशे सति एकाकिभावेन स्थितोः भवान् केन न दृश्यते। अर्थात् ग्राह्यग्राहकभावात्मकसंक्षुभितविकल्पदशायामपि भक्तजनानां कृते भवान् सुदर्शनोऽस्ति।

यदा योगिनः व्युत्थानदशायां स्वात्मप्रथा विकासं प्राप्नोति तदा परप्रमातृभावात्मकेन स्वात्मविमर्शेन तस्य च्युतिः न भवति।

समाधिवज्रेणाप्यन्यैरभेद्यो भेदभूधरः।
परामृष्टश्च नष्टश्च त्वद्भक्तिबलशालिभिः॥

अर्थात् दुर्भेद्यः पर्वतः समाधिरूपेण वज्रेण अपि अभेद्यः भवति। किन्तु पराभक्त्या सुशोभितः पुरुषः भेदप्रथनात्मकं पर्वतं स्वात्मपरामर्शद्वारा नाशयति। इयमवस्था जगदानन्दावस्था इति अभिनवगुप्तेनोक्तम्।

जगदानन्दावस्थायाः स्वरूपमेवं वर्तते—

यत्र कोऽपि व्यवच्छेदो
नास्ति यद्विश्वतः स्फुरत्।
यदनाहतसंवित्ति—
परमामृतबृंहितम्॥
यत्रास्ति भावनादीनां
न मुख्या कापि संगतिः।
तदेव जगदानन्द—
मस्मभ्यं शम्भुरूचिवान्॥

—तन्त्रा०, पृ०=5.5

अर्थात् यस्यां दशायां न केनापि प्रकारेण स्वरूपावच्छेदो भवति, स्वात्मचमत्कृति अनुभूयते, या अवस्था पूर्णाहन्तात्मकानन्दरसेन परिपूर्णा भवति यत्र ध्यानधारण समाधीनां नास्ति प्रयोजनं सा अवस्था जगदानन्दावस्थेति श्रीशम्भुना मद्गुरुण प्रोक्तमिति अभिनवगुप्तस्य अभिप्रायः।

परप्रमातृरूपा संविद् देवी प्रमेय-प्रमाण-प्रमातृपदेषु सृष्टिस्थितिसंहारानाख्यचक्र आश्रये स्वस्वरूपं विकासयति। अतः प्रमेयादित्रयः वर्गाः सृष्टयादिचक्रचतुष्टयेन द्वादशावस्थां प्राप्नुवन्ति।

परभगवत्या द्वादशावस्थाः विश्वस्य हानादानादिक्रियासु भवन्ति। तथापि जी

In Public domain. Digitization Muthulakshmi Research Academy

अल्पज्ञत्वात् सम्यक् आनन्दं न प्राप्नोति। आचार्याभिनवगुप्तेन जीवानां परमानन्दाय तन्त्रालोके लिखितम्—

इत्यजानन्नेव योगी
जानन्विश्वप्रभुर्भवेत्।
ज्वलन्निवासौ ब्रह्माद्यै—
र्दृश्यते परमेश्वरः॥ —तन्त्रा०, 4.144

अर्थात् द्वादशस्वरूपां कालीमज्ञात्वा न कोऽपि योगी सिद्धयोगी भवति। अतः यः कोऽपि यथार्थरूपेण एताः अवस्थाः जानन्ति स प्रभुः भवति। वस्तुतः सृष्टि-स्थिति-संहारानाख्य-चक्राणां परामर्शद्वारा देदीप्यमानः शिवतुल्यः प्रकाशरूपः योगी स्वात्मस्वरूपस्य साक्षात्कारं करोति। अन्यः स्वात्मसाक्षात्कारं कर्तुं न प्रभवति। केवलं परमेश्वरस्य तीव्रतमः शक्तिपातः गुरुकृपा वा इमां अवस्थां प्रापयितुं समर्थो भवति।

त्रिकशास्त्रम् अद्वैतवादः अन्तरर्थवादः इत्यपि उच्यते यतो हि त्रिकमतानुसारं बाह्यपदार्थाः तथ्यरूपतया स्वात्मसंविद्रूपतायां स्थिताः सन्ति। अतः बाह्याभिमत-शब्दादिविषयेषु अन्तः संविच्छक्त्या विकासानुभवः करामलकवत् भवति।

अधुना काल्या द्वादशस्वरूपविषये उच्यते—

१. सृष्टिकाली :

परमेश्वर्याः सविद्देव्याः प्रथमः विकासः सृष्टिकालीरूपेण भवति। शब्दस्पर्श-रूपादीनां प्रत्यक्षग्रहणकाले निर्विकल्पं प्रत्यक्षं प्रथमक्षणे जायते। नामरूपादिरहितं निर्विकल्पकं ज्ञानं प्रथमाभासः भवति। तत्त्वदृष्ट्या क्रमस्तोत्रादिशास्त्रेषु इयमवस्था सृष्टिकाली नाम्नाभिधीयते। योगिनः वारं वारं अस्याः दशायाः चिन्तनं कृत्वा बाह्यक्रियासु पारमार्थिकीं परां भगवतीं पश्यन्ति। क्रमस्तोत्रेऽपि उक्तम्—

कौलार्णवानन्दघनोर्मिरूपा—
मुन्मेषमेषोभयभाजमन्तः।
निलीयते नीलकुलालये या
तां सृष्टिकालीं सततं नमामि॥

अर्थात् परप्रमातृस्वरूपा संविद्देवी नीलकुलालये निलीयते। तां कौलार्णवानन्दघनोर्मि-रूपां उन्मेषनिमेषोभयभाजं सृष्टिकालीं सततं नौमीत्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

२. रक्तकाली :

सृष्टिकाल्याः उदयानन्तरं नेत्रादिसाधनद्वारा रूपादिविषयचक्रेण सह पदार्थ रंजनात्मिकामनुरक्तिं संविद्देवी प्राप्नोति तथा विषयान् भुञ्जमाना सा प्रमातृरूपा संविद्देवी द्वितीयां स्वरूपविकासदशां प्राप्नोति। उत्पलाचार्योऽपि लिखति—

तत्तदिन्द्रियमुखेन सन्ततं
युष्मदर्चनरसायनासवम्।
सर्वभावचषकेषु पूरिते—
ष्वापिबन्नपि भवेयमुन्मदः 2 ॥

—स्तोत्रावली, 13.

इयमवस्था क्रमस्तोत्रादिरहस्यशास्त्रे रक्तकाली नाम्ना समाद्रियते। तथा चोक्तम्—

महाविनोदार्पितमातृचक्र—
वीरेन्द्रकासृग्रसपानसक्ताम्।
रक्तीकृतां च प्रलयात्यये तां
नमामि विश्वाकृतिरक्तकालीम् ॥

यया शुद्धविद्यया आनन्दयुक्तो योगी करणेश्वरीभिः योगिभिः लीना भवन्ति। तथा र एव परमेश्वरी संवित् सिद्धयोगीनां गोष्ठिषु महापानलीलायां लीना भवति। महायोगिनं मेलापदशायां दुर्गा भगवती एव हवनजपादिकार्यं सम्पादयति। सा सर्वतः तस्र महागोष्ठ्यां देदीप्यमाना तिष्ठति। अतः स्थितिरूपविश्वोन्मेषदशायां निर्विकल्पकभावे सा अनुरक्ता भवति। तां विश्वाकारां रक्तकालीं भगवतीं नौमि।

३. स्थितिनाशकाली :

तृतीये विकासे भगवत्याः काल्याः प्रमेयपदान्तर्गतायाः संहारदशायाः वर्णनमस्ति रक्तकाल्याः विषयग्रहणात्मकचमत्कारस्य तृप्तिपर्यन्तं उदिता परप्रमातृरूपा संवित् "ज्ञा मयार्थः" इति रीत्या तृप्ता भूत्वा अन्तर्मुखतामाश्रयते। तदा सा ग्राह्यग्रहणस्थि स्वात्मसात् करोति एवं स्थितिनाशकालीरूपेण प्रकटी भवति। तन्त्रालोके अभिनवगुप्त लिखति—

तास्तृप्ताः स्वात्मनः पूर्णं
हृदयैकान्तशायिनम्।
चिद्व्योमभैरवं देव—
मभेदेनाधिशेरते ॥

—तन्त्रा०, 3.2

In Public domain. Digitization Muthulakshmi Research Academy

अर्थात् इन्द्रियाणि भोगान् भुक्त्वा तृप्तानि भूत्वा (करणेश्वरीदेव्याः) हृदयस्थाने विश्रामं कुर्वन्ति आकांक्षादिरहितापि भैरवनाथेन सह रमन्ते। ईदृशी परासंवित् स्थितिनाश-कालीनाम्ना वर्णिता अस्ति।

वाजिद्वयस्वीकृतवातचक्र–
प्रकान्तसंघट्टगमागमस्थाम्।
शुचिर्ययास्तं गमितोर्चिषा तां
शान्तां नमामि स्थितिनाशकालीम्॥

अर्थात् यया अर्चिषा शुचिः अस्तंगमितः तां वाजिद्वय-स्वीकृत-वातचक्रप्रकान्तसंघट्ट-गमागमस्थां शान्तां स्थितिनाशकालीं नमामि। प्राणापानौ वायू वाजिनौ स्तः। तौ वातचक्रं स्वाधीने कृत्वा श्वासप्रश्वाससंघट्टने तिष्ठतः। तयोः सन्धौ परप्रमातृरूपा देवी तिष्ठति। या संवित् देवी स्वार्चिषा दीप्तिभिः शुचि (अग्नि) प्रमातारं अस्तं गमयति। तस्यै स्थितिनाशकाल्यै नमः।

उत्पलाचार्योऽपि लिखति–

यत्र सोऽस्तमयमेति विवस्वां–
श्चन्द्रमःप्रभृतिभिः सह सर्वैः।
कापि सा विजयते शिवरात्रिः
स्वप्रभाप्रसरभास्वररूपा॥

–शिवस्तो०, 4.22

अर्थात् यस्यामवस्थायां प्राणरूपः सूर्यदेवः अपानरूपः चन्द्रः, विकल्परूपं तारामण्डलं च अस्तं गच्छति, सा चिदानन्दरूपज्योतिःप्रसरैः देदीप्यमाना परप्रमातृरूपा शिवरात्रिः जयतु।

४. यमकाली :

परासंवित्तिरूपायाः काल्याः अनाख्यदशा द्विविधा विभक्ताऽस्ति। बहिर्मुख-स्वरूपाच्छादनरूपा अन्तर्मुख-स्वरूपोन्मीलनरूपा च। शैवयोगिन एव अवस्थाद्वयं अनुभवन्ति। योगी (उद्यमो भैरवः) उद्यन्तृतास्पदे कटिबद्धो भवति तदा अनाख्य-दशायां प्रविष्टः सन् एव स्वरूपप्रथनात्मके विकास-समाधौ प्रविष्टो भवति। अतः स्पन्दशास्त्रे उक्तम्–

In Public domain. Digitization Muthulakshmi Research Academy

तदा तस्मिन् महाव्योम्नि,
प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढो
प्रबुद्धः स्यादनावृतः ।। —1.25

अर्थात् यदा सूर्यसोमरूपौ प्राणापानौ अथवा प्रमाणप्रमेयौ सर्वतोभावेन चिदाकाशे लयं गच्छतः, तदापि मूढो योगी महामायारूप-सुषुप्तावस्थां गच्छति एवं प्रबुद्धो योगी स्वविमर्शपरायणो भवति । इमां दशां प्राप्य योगी आवागमनचक्रान्मुक्तो भवति ।

अतः महाग्रास-महाविलासं कुर्वतीं पराचितिमेव यमकालीं कथयति आचार्यः—

सर्वार्थसंकर्षणसंयमस्य
यमस्य यन्तुर्जगतो यमाय ।
वपुर्महाग्रासविलासरागा—
त्संकर्षयन्तीं प्रणमामि कालीम् ।।

अर्थात् अहं तां सर्वार्थ-संकर्षण-संयमस्य यमस्य यन्तुः वपुः जगतः यमाय महाग्रास-विलासरागात् संकर्षयन्तीं कालीं नौमि ।

अत्र देहप्रमातृतां तस्यां लयीकृत्य परास्वरूपे योगी प्रविशति । प्रमेयगतः सृष्टि-स्थिति-संहारानाख्यरूपतामाश्रित्य सृष्टिकालीरक्तकालीस्थितिनाशकालीयमकाली इति चतसृणां स्वरूपमुक्तम् ।

५. संहारकाली :

अधुना प्रमाणपदस्थसृष्टिदशायां वर्णनं क्रियते । यदा योगिनः प्रमेयगतानाख्य-दशायां स्वात्मसंविदः स्वरूपगोपनात्मक-स्वरूपोन्मीलनात्मकरूपद्वयं अनुभवन्ति तदा गुरूकृपया ते स्वरूपगोपात्मिकां बहिर्मुखवृत्तिं समूलं संहरन्ते, अर्थात् अन्तर्मुख-पदमाश्रित्य लयीभूतं कुर्वन्ति, तदाऽनायासेन योगिनः प्रमाणसम्बन्धिसृष्टिदशां प्रविशन्ति । ततः पुनः स्वरूपगोपनात्मिका बहिर्मुखवृत्तिः न योगिनमावेष्टयति । अतः योगी निर्विकल्पकरूपेण उन्मनारूपस्वात्मसंवित्तौ भावसंहाररूपामवस्थां अनुभवति । आचार्यः उत्पलो लिखति—

विलीयमानास्त्वय्येव
व्योम्नि मेघलवा इव ।
भावा विभान्तु मे शश्वत्
क्रमनैर्मल्यगामिनः ।। —स्तोत्रा०, 6.7

In Public domain. Digitization Muthulakshmi Research Academy

अर्थात् हे प्रभो ! आकाशे लीना मेघखण्डा इव घटपटादिपदार्थाः भवतः स्वरूपे एव क्रमेण लयं गत्वा मया द्रष्टुं योग्याः भवन्तु ।

इयं अवस्था क्रमस्तोत्रादिरहस्यशास्त्रे श्रीसंहारकालिकानाम्ना उच्यते ।

उन्मन्यनन्ता निखिलार्थगर्भा
या भावसंहारनिमेषमेति ।
सदोदिता सत्युदयाय शून्यां
संहारकालीं मुदितां नमामि ।।

अर्थात् या परमेश्वरी संवित् समस्तसंहारात्मकविकल्पान् संहृत्य उन्मनारूपा अस्ति । समस्तान् पदार्थान् स्वीये धृत्वा अनन्तरूपा अस्ति. या काली देवी स्वात्माग्नौ समस्त-भावमण्डलान् उपसंहृत्य भावसंहारस्थितिमाश्रयते एवं या उद्यन्तृत्तास्पदमवलम्ब्य बहिस्फाररूपात् उदयात् शून्याऽस्ति । ताम् आनन्दघनां संहारकालीं प्रणमामि ।

६. मृत्युकाली :

भगवत्याः काल्याः अस्मिन् विकासे प्रमाणदशान्तर्गतस्थितिचक्रं वर्ण्यते । संहारकाल्या समस्तप्रमेयवर्गस्य समूलं उच्छेदः क्रियते । तथापि तस्य संहृतवस्तुनः संस्काररूपोपाधिः विद्यमानो भवति । तदा तेनोपाधिना संहारकाली–"मयैतदर्थजातमात्मनि अभेदेनैवाव-भासितम्" इति भावसंहृतपरामर्शसंस्कारोपाधीन् यदा संविद् भगवती परप्रमातृस्वरूपे लयीभूतं करोति तदा सा मृत्युकाली इति नाम्ना उच्यते । इयं संवित् संहारकाली-मपि स्वस्वरूपे संहरति । अतः क्रमस्तोत्रे उक्तम्–

ममेत्यहंकारकलाकलाप–
विस्फारहर्षोद्धतगर्वमृत्युः ।
ग्रस्तो यया घस्मरसंविदं तां
नमाम्यकालोदितमृत्युकालीम् ।।

अर्थात् मया समस्तं प्रमेयमण्डलं स्वरूपे लयं नीतम् इति अहङ्कारसमूहप्रसारित-स्वात्मानन्दहर्षोत्कृष्टगर्वमुक्ता मृत्युरूपा संवित् यथा परमेश्वर्या सम्पूर्णतया ग्रस्तां तां महाग्रासप्रवणरसिकां कालकलनारहितां मृत्युकालीरूपां संविद्देवीं प्रणमामि । इयं पूर्णाहन्तारूपा मृत्युकाली वर्तते । अतएव उत्पलाचार्यो लिखति–

त्वामगाधविकल्पमद्वयं
स्वस्वरूपमरिवलार्थघस्मरम् ।

In Public domain. Digitization Muthulakshmi Research Academy

आविशन्नहमुमेश सर्वदा
पूजयेयमभिसंस्तुवीय च ।।

—स्तोत्रा०, 13.20

अर्थात् हे शिव ! अपारनिर्विकल्पके अभेदरूपे समस्तभेदात्मकपदार्थग्राह्यमाने त्वयि प्रविश्य अहं तव पूजां कुर्याम् ।

७. भद्रकाली :

इयं संविद्रूपाया पारमेश्वर्याः विकासे परप्रमातृरूपा चिन्महेश्वरी प्रमाणगतसंहार-स्वरूपा भद्रकाली वर्तते।

यद्यपि कार्यरूपसमस्तभाववर्गः उपाधिरहितः शुद्धः प्रमातृसंवित्तौ लयवशात् संहृतो वर्तते तथापि स्वाप्रतिहतस्वातन्त्र्यशक्त्या शतशः प्रतिपादिता परासंवित् तं भाववर्गं संहृत्य पुनः नियतरूपं पदार्थं घनीभूतं कृत्वा तस्य संस्कारात्मिकां अस्तित्वशङ्कां पुनः समुत्थापयति । अस्मात् कालान्तरे प्रमाता पुनः संसारचक्रे पतितुं शक्नोति । अतः चिन्महेश्वरी कालिका देवी स्वकीये सप्तमे विकासे भद्रकालीरूपेण उदेति । भद्रस्य अर्थो भवति विभिन्नविलासानां स्वस्वरूपे लयः ।

विश्वं महाकल्पविरामकल्प—
भवान्तभीमभ्रुकुटिभ्रमन्त्या ।
याश्नात्यनन्तप्रभवर्चिषा तां
नमामि भद्रां शुभभद्रकालीम् ।।

अर्थात् महाकल्पान्तसदृशसंहारावस्थायां भयंकराः भ्रुकुटीः संचाल्य अनन्तसामर्थ्ययुक्ता-चिदीश्वरी स्वचिद्रूपदीप्तिभिः प्रमेयप्रमाणरूपं विश्वं ग्रसति । तां भद्ररूपां कल्याणमयीं भद्रकालीं भगवतीं नौमि । भद्रकालावस्थायां उत्थिताः शंकाः स्वयमेव नाशं प्राप्नुवन्ति अस्यामवस्थायां योगी अनायासेन शङ्काः विनाश्य साक्षात्कारं कर्तुं प्रभवति । अतः तन्त्रालोके उक्तम्—

तथा हि शङ्कामालिन्यं
ग्लानिः संकोच इत्यदः ।
संसारकारागारान्तः
स्थूलस्थूणा घटायते ।।

—तन्त्रा०, 12.2(

In Public domain. Digitization Muthulakshmi Research Academy

शङ्का एव मलत्रयमस्ति । शङ्का एव अज्ञानोत्पन्नः प्रमादोऽस्ति । इयं शंका कारागार-स्थितस्तम्भ इव वर्तते यत्र जीवः बद्धो भवति ।

८. मार्तण्डकाली :

अस्मिन् विकासे प्रमाणवर्गान्तर्गतायाः परमेश्वर्याः अनाख्यदशायाः वर्णनं वर्तते । भगवत्याः सप्तमे विकासे प्रमेयमण्डलं सर्वतोभावेन विलीनमभूत् । तथापि प्रमाणदशायां स्थितं प्रमेयसमूहं पुनर्जीवनं प्रदातुं द्वादशेन्द्रियाणि संहृत्य स्वाश्रये अहङ्कारे समावेश-प्राप्तिं विना सूक्ष्मरूपेण तिष्ठन्ति । अतः अष्टमे विकासे स्वस्वातन्त्र्यवशात् परप्रमातृ-रूपा परमेश्वरी देवी द्वादशेन्द्रियरूपाणि साधनानि तदाश्रयभूतेऽहंकारं लीनं कृत्वा विश्वमयस्वरूपे मार्तण्डकालीरूपेण उदेति । तथा चोक्तम्–

मार्तण्डमापीतपतङ्गचक्रं
पतङ्गवत्कालकलेन्धनाय ।
करोति या विश्वरसान्तकां तां
मार्तण्डकालीं सतत प्रणौमि ।।

भोग्यवर्गे विलीना सती परासंविद्रूपा जगदीश्वरी मार्तण्डरूपमहङ्कारप्रमातारं एवं संस्थापयति येन प्रमाता भोगसाधनरूपं पतङ्गचक्रं तथा नाशयति यथा दीपकोपरि पतङ्गा नाशं गच्छन्ति । एवं समस्तशब्दादिविषयरसान् स्वस्वरूपे लयीकृत्य मार्तण्ड-काली भगवती तिष्ठति । तां प्रणमामि । अस्यामवस्थायां इन्द्रियाणि उदयं प्राप्य विलीनानि भवन्ति । अतएव केनापि आचार्येणोक्तम्–

करणमरीचिचक्रमुदयं कुरूते रभसात्
स्थितिमुपयाति तत्र परसौख्यरसान्ततया ।
विलयमुपैति चात्र परबोधभरक्षपणात्
परमकलात्र केवलतया विलसत्यमला ।।

अर्थात् अस्यामवस्थायां द्वादशविधानि इन्द्रियाणि सहर्षं उदयं प्राप्य तस्यां परादेव्यां विश्रामं कुर्वन्ति । अपरिमितपरज्ञानात्मकप्रकाशवशात् इन्द्रियचक्रं तस्मिन् तेजसि लयं प्राप्नोति । अतः अस्यां दशायां निर्मला परमा कला परप्रमातृरूपा शिवकला एकाकिनी विलसति ।

९. परमार्ककाली :

अष्टमविकासपर्यन्तं काली प्रमाणांशभक्षणे तत्परा आसीत् । नवमे विकासे प्रमातृपदचर्वणारम्भं करोति । अतः अत्र प्रमातृगतसृष्टिचक्रस्य वर्णनं क्रियते ।

In Public domain. Digitization Muthulakshmi Research Academy

मार्तण्डकाल्यवस्थायां द्वादशेन्द्रियसमूहः अहंकारनाम्नि परमादित्यस्वरूपे पूर्णतः विलीनो भवति। तदनन्तरं अहंकाराख्यः त्रयोदशः परमादित्यः प्रमातृभावं प्रति पूर्णतः सन्मुखः सन् प्रमातृसंविदा सह तदाकारो भवति। एवंप्रकारेण परमेश्वरी संवित् अहंकारनामकं परमादित्यमपि स्वमितप्रमातृसंवित्तौ लयीकर्तुं भगवती परमार्ककालीस्वरूपेण उल्लासयति। अस्यां परिमितप्रमातृदशायां जीवगतपरिमितप्रमातृदशायां महान् भेदोऽस्ति इति अवगन्तव्यम्। अस्यां परिमितप्रमातृदशायां संस्कारमात्रेणापि विषयेन्द्रियाणामुपाधिः न भवति। केवलं प्रमातृप्रकाशः निर्विकल्परूपतया प्रकाशमानः तिष्ठति। अतएव आचार्योऽभिनवगुप्तः अस्यां कोटौ परिमितप्रमातृसवित्ति कालाग्नि-रूद्ररूपेणावोचत्। तन्त्रालोके कालाग्निरूद्रदशायाः वर्णनं इत्थं वर्तते—

कालाग्निरूद्रसंज्ञास्य शास्त्रेषु परिभाषिता
कालो व्यवच्छित्तयुक्तो वह्निर्भोक्ता यतः स्मृतः।
संसाराक्लृप्तिक्लृप्तिभ्यां रोधनात् द्रावणात्प्रभुः
अनिवृत्तपशूभावस्तत्राहंकृत्प्रलीयते ।।

अयं कालाग्निरूद्रप्रमाता भूतवर्त्तमानादिव्यवच्छेदयुक्तः अग्निस्वरूपोऽस्ति। संसारस्य सृष्टि-संहृतिवशात् अयं प्रमाता राधनद्रावणकर्ता रूद्र इति उच्यते। क्रमस्तोत्रे इयं संवित् परमादित्यकाली अथवा परमार्ककालीरूपेण संस्तुता वर्तते—

अस्तोदितद्वादशभानुभाजि
यस्यां गता भर्गशिखा शिखेव।
प्रशान्तधाम्नि द्युतिना शमेति
तां नौम्यनन्तां परमार्ककालीम् ।।

अर्थात प्रमातृसंविदीश्वरी परादेवी प्रमाप्रमेयक्षोभशून्यत्वात् पूर्णतः शान्तरूपेण तिष्ठति। उदयास्तस्वरूपम् इन्द्रियरूपादित्यं स्वस्वरूपे लयीकृत्य चमत्कारं करोति। तस्मिन् तेजसि भर्गशिखारूपाहङ्कारनामकः परमादित्यः स्वतेजः परिसमाप्य तत्रैव लयं गच्छति। तादृशानन्तदीप्तिरूपा परामार्ककाली स्तुत्या वर्तते। अर्थात् स्वदेहादिप्रमातृभावं तत्र लयीकृत्य तत्स्वरूपे समाविष्टोऽस्मि इति योगिनः ज्ञानं जायते।

१०. कालाग्निरूद्रकाली :

कालाग्निरूद्रकालीरूपेण जगदीश्वर्याः प्रमातृगतस्थितिदशायाः स्वरूपमुच्यते।
यदा कालाग्निरूद्रनामकः कल्पितः प्रमाता द्वादशेन्द्रियरूपमादित्यं अहंकाररूपं

In Public domain. Digitization Muthulakshmi Research Academy

परमादित्यं स्वतेजसि कवलयति तदानीं स प्रमाता स्वस्वातन्त्र्यवशात् स्वां परिमितितामपि अहत्वात्मके अपरिमिततत्त्वे प्रवेशयति। तदा कालाग्निरूद्ररूपे कल्पितप्रमाता विश्वाभेदैकशोभितः अनन्तविकासयुक्तः परप्रमातृरूपायां पूर्णाहन्ताविमर्शघनस्वरूपायां महाकाल्यां पूर्णतः लयं प्राप्नोति। इयमस्याः परमपूज्यावस्था भवति।

क्रमस्तोत्रशास्त्रे उक्तम्—

कालक्रमाक्रान्तदिनेशचक्र–
क्रोडीकृतान्ताग्निकलाप उग्रः।
कालाग्निरूद्रो लयमेति यस्यां
तां नौमि कालानलरुद्रकालीम्॥

कालाग्निरुद्रकाली (कल्पितप्रमातृरूपा संवित्तिः) कालस्य सृष्ट्यादिपंचकृत्याक्रान्तद्वादशादित्यरूपप्रमाणमण्डलं स्वीये स्वात्माग्नौ एव लीनं गमयति। तदानीं भयंकरतेजोराशियुक्तामितप्रमातृरूपा काली देवी यस्यां पराकाल्यां लयं प्राप्नोति तत्परमतेजःसम्पन्नं कालाग्निरुद्रं प्रमातारं विनाशकर्त्री कालाग्निरुद्रकाली भवति। तां प्रणमामि अर्थात् स्वीयं देहप्राणपुर्यष्टकाद्यनात्मवर्गे स्थितं अहन्तारूपं तस्मिन् परमे तेजसि लयं प्राप्नोमि इत्यर्थः।

११. महाकालकाली :

अस्मिन् विकासे पराकाल्याः देव्याः स्वरूपं प्रमातृपदस्य संहारचक्रे विविच्यते। दशमे विकासे वर्णिता व्यापिनी कालाग्निरूद्ररूपा परमेश्वरी सर्वसवरूपतया प्रकाशमाना वर्तते। अस्यामवस्थायां योगी अलंग्रासभैरवात्मिकां स्थितिं अनुभवति। अस्यां अवस्थायां समस्तभाववर्गस्य निसंस्काररूपेण प्रशमनं भवति। अतः स्वात्मसंवित्तिः परिपूर्णा सती दृष्टिगोचरी भवति। परन्तु अस्यामवस्थायां स्थिता महाकाली अपि स्वस्वभावभूते अकुलधाम्नि प्रवेष्टुं समुत्सुका भवति। अतः परादेवी एकादशे विकासे महाकालकालीरूपेण संवित्तस्वरूपा भगवती आविर्भवति। अस्यामवस्थायां योगी कालकलनां समुल्लंघ्य समनानामाख्ये स्थाने आरूढो भवति एवं स अकालकलितो भवति। अत. तदानीं कालोऽपि स्वसत्तां त्यजति। अतः योगिनां कृते तदा अनन्तकालोऽपि क्षणमिव प्रतिभाति। उत्पलचार्योऽपि लिखति—

न सदा न तदा न चैकदेत्यपि सा यत्र कालधीर्भवेत्।
तदिदं भवदीयदर्शनं न च नित्यं न च कथ्यतेऽन्यथा॥

In Public domain. Digitization Muthulakshmi Research Academy

अर्थात् हे विभो ! यदा कालसृष्टिकर्त्री बुद्धिः न विद्यमाना भवति। तदैव तव स्वरूप यथार्थदर्शनमस्ति। तन्न नित्यं न वाऽनित्यं वक्तुं शक्यते। अतः कालकल शून्यत्वात् इयं संवित् महाकालकालीरूपेण विभूषिता भवति। क्रमस्तोत्रे उक्तम्–

नक्तं महाभूतलये श्मशाने
दिक्खेचरीचक्रगणेन साकम्।
कालीं महाकालमलं ग्रसन्तीं
वन्दे ह्यचिन्त्यमनिलानलाभाम्॥

अर्थात् भेदप्रथारूप बाह्यप्रकाशशून्यायां महारात्रौ यत्र पंचमहाभूतानि अपि पूर्णरूपे लयं प्राप्नुवन्ति अर्थात् यस्यामवस्थायां देहप्रमातृताप्राणप्रमातृतापुर्यष्टकप्रमातृत शून्यप्रमातृतारूपाः भावा सर्वतोभावेन संहृताः भवन्ति, तादृशान्तःप्रकाशपूर्णहृदयरू श्मशाने ज्ञानेन्द्रिय-कर्मेन्द्रियस्थाने विराजमाना चिन्महेश्वरी देवी खेचरीशक्तिसमन्वि महाकालमपि पूर्णतः कवली करोति। एवमनया रीत्या वायुवग्नितुल्या देदीप्यमा अचिन्त्यमहिमायुक्ता महाकालमपि कवलीकृतत्वात् महाकालकालीनाम्ना भगव स्तुत्या भवति। अर्थात् योगी तंस्याः अचिन्त्यस्वरूपे प्रविशति।

१२. महाभैरवघोरकाली :

चिच्चमत्कृतिमय्याः कालीदेव्याः अन्तिमो विकासः प्रमातृवर्गे स्थितस्य अनाख्यचक्रः सर्वोच्चावस्थायाः स्वरूपवर्णनं क्रियते।

महाकालकालीरूपा संवित् अस्मिन् अनाख्यधाम्नि स्फुटतमतां प्राप्य पूर्णरूपे विकसति। तदानीं स्फारीभूता परप्रमातृरूपा चमत्कृतिः पूर्ववर्णितां सम्पूर्णामवस्व जनयति। एवं स्वस्वरूपे आत्मसात्कर्तुं तदाश्रयस्थानमपि भवति। सर्वामवस्व उदयकाले सा परप्रमातृरूपा परा देवी पूर्णरूपा इत्युच्यते। तथा पुनः पूर्ववर्णितामवस्व स्वायत्तीकृत्य दुर्घटसम्पादनात्मिका महेश्वरी कृशरूपा भवति। यतो हि अनाख्यच केवलं कालसंकर्षिणी कला विद्यमाना भवति। अतः अभिनवगुप्ताचार्यो लिखति–

इत्थं द्वादशधासंवित्तिष्ठन्ती विश्वमातृषु।
एकैवेति न कोऽप्यस्याः क्रमस्य नियमः क्वचित्॥

क्रमाभावान्न युगपत्तदभावात्क्रमोऽपि न।
क्रमाक्रमकथातीतं संवित्तत्त्वं सुनिर्मलम्।

अर्थात् प्रमातृरूपेण युक्ता द्वादशस्वरूपा संविद्देवी विश्वमातृगणे स्थिता वस्तुतः एकरू रूपयुक्तास्ति। अस्याः परमेश्वर्याः न कोऽपि क्रमः न वा किमपि स्थानमस्ति।

In Public domain. Digitization Muthulakshmi Research Academy

क्रमाक्रमरूपतां समुल्लंघ्य इयं भगवती काली देवी देदीप्यमाना तिष्ठति। इयं काली "महाभैरव-घोरचण्डकाली" इति नाम्ना प्रसिद्धाऽस्ति। अत्र चण्डपदात् प्रमेयचक्रस्य, घोरशब्दात् प्रमाणचक्रस्य, महाभैरवात् प्रमातृचक्रस्य संकेतो भवति। अतः प्रमेयचक्रं प्रमाणचक्रं प्रमातृचक्रं कवलीकृत्य अनाख्यारूपा इयं महाकाली भगवती "महाभैरव घोरचण्डकाली" इत्युच्यते। क्रमस्तोत्रे उक्तम्–

क्रमत्रयत्वाष्ट्रमरीचिचक्र—
संचारचातुर्यतुरीयसत्ताम्।
वन्दे महाभैरव-घोरचण्ड—
कालीं कलाकाशशशाङ्ककान्तिम्॥

अर्थात् प्रमेय-प्रमाण-प्रमातृरूपैः त्रिभिः क्रमैः देदीप्यमाना सूर्यसम्बन्धिद्वादशमरीचिमण्डल-संचारवशात् या परप्रमातृरूपा संविच्चक्रेश्वरी अनाख्यरूपतुरीयसत्तास्वरूपं बिभ्रति तथा यस्याः कालसंकर्षिणीरूपा अमाकला सर्वतः प्रभायुक्ता चन्द्रवत् चिदाकाशे भासते, तां सर्वलक्षणसम्पन्नां महाभैरवघोरचण्डकालीं भगवतीं नौमि। अर्थात् योगीं देह-प्राणपुर्यष्टक-शून्यप्रमातृपदानि लयीभूतानि कृत्वा कालीदेव्याः अनन्ते आनन्दरसप्रपूर्णे स्वरूपे समावेशं करोति। एवं काल्याः परं धाम प्रकाशयुक्तं भासते।

सृष्टिकालीं रक्तकांलीं स्थितिनाशकरीं पराम्।
यमकालीं सदा भक्त्या नत्वा संहारकालिकाम्॥
मृत्युकालीं भद्रकालीं तथा मार्तण्डकालिकाम्।
परादित्यां महाकालों कालाग्निरूद्रकालिकाम्॥
महाकालस्वरूपां तां संविद्रूपां परं महः।
महाभैरवघोराख्यचण्डकालीमुपास्महे॥

---

[1]क्रमस्तोत्र–सिद्धनाथकृत ; (सम्यवतया शम्भुनाथः)

In Public domain. Digitization Muthulakshmi Research Academy